# ॥ શ્રીકુમારત્રિશતી ॥

.. shrIkumAratrishatI ..

sanskritdocuments.org

August 20, 2017

# .. shrIkumAratrishatI ..

# ॥ શ્રીકુમારત્રિશતી ॥

## Sanskrit Document Information

Text title : kumAratrishatI

File name : kumAratrishatI.itx

Category : shatI, subrahmanya

Location : doc_subrahmanya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran

Latest update : July 14, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીકુમારત્રિશતી ॥

શત્રુંજયત્રિશતી

ૐ અસ્ય શ્રીકુમારત્રિશતીમહામન્ત્રસ્ય માર્કણ્ડેય ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । કુમારષણ્મુખો દેવતા । કુમાર ઇતિ બીજમ્ ।
શાખ ઇતિ શક્તિઃ । વિશાખ ઇતિ કીલકમ્ । નેજમેષ ઇત્યર્ગલમ્ ।
કાર્તિકેય ઇતિ કવચમ્ । ષણ્મુખ ઇતિ ધ્યાનમ્ ॥

ધ્યાનમ્ -
ધ્યાયેત્ ષણ્મુખમિન્દુકોટિસદૃશં રત્નપ્રભાશોભિતં
બાલાર્કદ્યુતિષટ્કિરીટવિલસત્ કેયૂરહારાન્વિતમ્ ।
કર્ણાલમ્બિતકુણ્ડલપ્રવિલસદ્ગણ્ડસ્થલાશોભિતં
કાઞ્ચીકઙ્કણકિઙ્કિણીરવયુતં શૃઙ્ગારસારોદયમ્ ॥

ધ્યાયેદીપ્સિતસિદ્ધિદં ભવસુતં શ્રીદ્વાદશાક્ષં ગુહં
ખેટં કુક્કુટમઙ્કુશં ચ વરદં પાશં ધનુશ્ચક્રકમ્ ।
વજ્રં શક્તિમસિં ચ શૂલમભયં દોર્ભિર્ધૃતં ષણ્મુખં
દેવં ચિત્રમયૂરવાહનગતં ચિત્રામ્બરાલઙ્કૃતમ્ ॥

અરિન્દમઃ કુમારશ્ચ ગુહસ્સ્કન્દો મહાબલઃ ।
રુદ્રપ્રિયો મહાબાહુરાગ્નેયશ્ચ મહેશ્વરઃ ॥ ૧ ॥

રુદ્રસુતો ગણાધ્યક્ષઃ ઉગ્રબાહુર્ગુહાશ્રયઃ ।
શરજો વીરહા ઉગ્રો લોહિતાક્ષઃ સુલોચનઃ ॥ ૨ ॥

મયૂરવાહનઃ શ્રેષ્ઠઃ શત્રુજિચ્છત્રુનાશનઃ ।
ષષ્ઠીપ્રિય ઉમાપુત્રઃ કાર્તિકેયો ભયાનકઃ ॥ ૩ ॥

શક્તિપાણિર્મહેષ્વાસો મહાસેનઃ સનાતનઃ ।
સુબ્રહ્મણ્યો વિશાખશ્ચ બ્રહ્મણ્યો બ્રાહ્મણપ્રિયઃ ॥ ૪ ॥

નેજમેષો મહાવીરઃ શાખો ધૂર્તો રણપ્રિયઃ ।
ચોરાચાર્યો વિહર્તા ચ સ્થવિરઃ સુમનોહરઃ ॥ ૫ ॥

પ્રણવો દેવસેનેશો દક્ષો દર્પણશોભિતઃ ।
બાલરૂપો બ્રહ્મગર્ભો ભીમો (૫૦) ભીમપરાક્રમઃ ॥ ૬ ॥

શ્રીમાન્ શિષ્ટઃ શુચિઃ શીઘ્રઃ શાશ્વતઃ શિખિવાહનઃ ।
બાહુલેયો બૃહદ્બાહુર્બલિષ્ઠો બલવાન્બલી ।
એકવીરો મહામાન્યઃ સુમેધા રોગનાશનઃ ।
રક્તામ્બરો મહામાયી બહુરૂપો ગણેશ્વરઃ ॥ ૮ ॥

ઇષુહસ્તો મહાધન્વી ક્રૌઞ્ચભિદઘનાશકઃ । ભિચ્ચાઘનાશકઃ (for metre matching)
બાલગ્રહો બૃહદ્રૂપો મહાશક્તિર્મહાદ્યુતિઃ ॥ ૯ ॥

ઉગ્રવીર્યો મહામન્યુઃ રુચિરો રુદ્રસમ્ભવઃ ।
ભદ્રશાખો મહાપુણ્યો મહોત્સાહઃ કલાધરઃ ॥ ૧૦ ॥

નન્દિકેશપ્રિયો દેવો લલિતો લોકનાયકઃ ।
વિદ્વત્તમો વિરોધિઘ્નો વિશોકો વજ્રધારકઃ ॥ ૧૧ ॥

શ્રીકરઃ સુમનાઃ સૂક્ષ્મઃ સુઘોષઃ સુખદઃ સુહૃત્ (૧૦૦) ।
વહ્નિજન્મા હરિદ્વર્ણઃ સેનાની રેવતીપ્રિયઃ ॥ ૧૨ ॥

રત્નાર્ચી રઞ્જનો વીરો વિશિષ્ટઃ શુભલક્ષણઃ ।
અર્કપુષ્પાર્ચિતઃ શુદ્ધો વૃદ્ધિકાગણસેવિતઃ ॥ ૧૩ ॥

કુઙ્કુમાઙ્ગો મહાવેગઃ કૂટસ્થઃ કુક્કુટધ્વજઃ ।
સ્વાહાપ્રિયો ગ્રહાધ્યક્ષઃ પિશાચગણસેવિતઃ ॥ ૧૪ ॥

મહોત્તમો મહામુખ્યઃ શૂરો મહિષમર્દનઃ ।
વૈજયન્તી મહાવીર્યો દેવસિમ્હો દૃઢવ્રતઃ ॥ ૧૫ ॥

રત્નાઙ્ગદધરો દિવ્યો રક્તમાલ્યાનુલેપનઃ ।
દુઃસહો દુર્લભો દીપ્તો ગજારૂઢો મહાતપઃ ॥ ૧૬ ॥

યશસ્વી વિમલો વાગ્મી મુખમણ્ડી સુસેવિતઃ ।
કાન્તિયુક્તો વષટ્કારો મેધાવી મેખલી મહાન ॥ ૧૭ ॥

નેતા નિયતકલ્યાણો ધન્યો ધુર્યો ધૃતવ્રતઃ ।
પવિત્રઃ પુષ્ટિદઃ (૧૫૦) પૂર્તિઃ પિઙ્ગલઃ પુષ્ટિવર્ધનઃ ॥ ૧૮ ॥

મનોહરો મહાજ્યોતિઃ પ્રદિષ્ટો મહિષાન્તકઃ ।
ષણ્મુખો હરપુત્રશ્ચ મન્ત્રગર્ભો વસુપ્રદઃ ॥ ૧૯ ॥

વરિષ્ઠો વરદો વેદ્યો વિચિત્રાઙ્ગો વિરોચનઃ ।

વિબુધાગ્રચરો વેત્તા વિશ્વજિત્ વિશ્વપાલકઃ ॥ ૨૦ ॥

ફલદો મતિદો માલી મુક્તામાલાવિભૂષણઃ ।
મુનિસ્તુતો વિશાલાક્ષો નદીસુતશ્ચ વીર્યવાન્ ॥ ૨૧ ॥

શક્રપ્રિયઃ સુકેશશ્ચ પુણ્યકીર્તિરનામયઃ ।
વીરબાહુઃ સુવીર્યશ્ચ સ્વામી બાલગ્રહાન્વિતઃ ॥ ૨૨ ॥

રણશૂરઃ સુષેણશ્ચ ખટ્વાઙ્ગી ખડ્ગધારકઃ ।
રણસ્વામી મહોપાયઃ શ્વેતછત્રઃ પુરાતનઃ ॥ ૨૩ ॥

દાનવારિઃ કૃતી કામી શત્રુઘ્નો ગગનેચરઃ (૨૦૦) ।
સુલભઃ સિદ્ધિદઃ સૌમ્યઃ સર્વજ્ઞઃ સર્વતોમુખઃ ॥ ૨૪ ॥

અસિહસ્તો વિનીતાત્મા સુવીરો વિશ્વતોમુખઃ ।
દણ્ડાયુધી મહાદણ્ડઃ સુકુમારો હિરણ્મયઃ ॥ ૨૫ ॥

ષાણ્માતુરો જિતામિત્રો જયદઃ પૂતનાન્વિતઃ ।
જનપ્રિયો મહાઘોરો જિતદૈત્યો જયપ્રદઃ ॥ ૨૬ ॥

બાલપાલો ગણાધીશો બાલરોગનિવારકઃ ।
જયી જિતેન્દ્રિયો જૈત્રો જગત્પાલો જગત્પ્રભુઃ ॥ ૨૭ ॥

જૈત્રરથઃ પ્રશાન્તશ્ચ સર્વજિદ્દૈત્યસૂદનઃ ।
શોભનઃ સુમુખઃ શાન્તઃ કવિઃ સોમો જિતાહવઃ ॥ ૨૮ ॥

મરુત્તમો બૃહદ્ભાનુર્બૃહત્સેનો બહુપ્રદઃ ।
સુદૃશ્યો દેવસેનાનીઃ તારકારિર્ગુણાર્ણવઃ ॥ ૨૯ ॥

માતૃગુપ્તો મહાઘોષો ભવસૂનુઃ (૨૫૦) કૃપાકરઃ ।
ઘોરઘુષ્યો બૃહદ્દ્યુમ્નો ધનુર્હસ્તઃ સુવર્ધનઃ ॥ ૩૦ ॥

કામપ્રદઃ સુશિપ્રશ્ચ બહુકારો મહાજવઃ ।
ગોપ્તા ત્રાતા (૨૬૦) ધનુર્ધારી માતૃચક્રનિવાસિનઃ ॥ ૩૧ ॥

ષડશ્રિશઃ ષડરષટ્કો દ્વાદશાક્ષો દ્વિષડ્ભુજઃ ।
ષડક્ષરઃ ષડર્ચિશ્ચ ષડઙ્ગઃ ષડનીકવત્ ॥ ૩૨ ॥

શર્વઃ સનત્કુમારશ્ચ સદ્યોજાતો મહામુનિઃ ।
રક્તવર્ણઃ શિશુશ્ચણ્ડો હેમચૂડઃ સુખપ્રદઃ ॥ ૩૩ ॥

સુહેતિરઙ્ગનાઽઽશ્લિષ્ટો માતૃકાગણસેવિતઃ ।
ભૂતપતિર્ગતાતઙ્કો નીલચૂડકવાહનઃ ॥ ૩૪ ॥

વચદ્ભૂ રુદ્રભૂશ્ચૈવ જગદ્ભૂઃ બ્રહ્મભૂઃ તથા ।
ભુવદ્ભૂર્વિશ્વભૂશ્ચૈવ મન્ત્રમૂર્તિર્મહામનુઃ ॥

વાસુદેવપ્રિયશ્ચૈવ પ્રહ્લાદબલસૂદનઃ ।
ક્ષેત્રપાલો બૃહદ્ભાસો બૃહદ્દેવોઽરિઞ્જયઃ (૩૦૧) ॥ ૩૬ ॥

ઇતિ શ્રીકુમારત્રિશતી સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIkumAratrishatI ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*